# विवेकभास्करः

## संस्कृतविभागीयभित्तिपत्रिका

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्, वेलुड़मठ

उद्घाटकः - स्वामी विद्विकषानन्द

निर्देशकः - डः. श्रीवेङ्कटरमणभट्टः, प्राध्यापकः संस्कृतविभागीयः

सम्पादकः - कृष्णपद-रुइदासः, आचार्यद्वितीयवर्षीयः

आलङ्कारिकः - शुभदीप-पालः, आचार्यद्वितीयवर्षीयः

वर्षम् - ०५ विषयः - रामानुजाचार्यः

प्रकाशनदिनाङ्कः -१२/७/१८, वासरः - गुरुवासरः

सूचीपत्रम


सम्पादकीयम्........................................................................................3

॥रामानुजचरितम्॥ - स्नातकद्वितीयवर्षीयः वासुदेव-गराइ।................................................4

॥ रामानुजाचार्यः ॥ - स्नातकद्वितीयवर्षीयः देवज्योति-कुण्डुः।..........................................6

॥ रामानुजाचार्यः ॥ - स्नातकद्वितीयवर्षीयः प्रभात-कुमार-मण्डलः।....................................8

॥ विशिष्टाद्वैतमते भगवान् नारायणः ॥ - आचार्यद्वितीयवर्षीयः मनमय-मान्ना।........................10

# सम्पादकीयम्

वेदान्तदर्शनमाश्रित्य बहुभिः विद्वद्भिः द्वैताद्वैतविशिष्टाद्वैतभेदेन भिन्नं भिन्नं भाष्यं विरचितम्। तत्र विशिष्टाद्वैतमतं सुदृढं प्रतिष्ठापितवान् विद्वान् रामानुजाचार्यः। अस्य जीवनकालस्तावत् सप्तदशोत्तरसहस्रतमेशवीयाब्दात् (१०१७) सप्तत्रिंशदुत्तरैकादशशततमेशवीयाब्दः (११३७) स्वीक्रियते। तस्य माता आसीत् कान्तिमती, पिता च केशवाचार्यदीक्षितः। आबाल्यात् सः हरिभक्तः सर्वान् हरिभक्तान् सज्जनान् अमन्यत। यादवप्रकाशगुरोः अयं वैदिकशिक्षामध्यगच्छत्। वेदान्तमधीतवान् यामुनाचार्यगुरोः सकाशात्। तस्यैव आदेशेन सः ब्रह्मसूत्रोपरि श्रीभाष्यनामकं भाष्यं व्यरचयत्। न केवलमिदमपि च विष्णुसहस्रनामदिव्यप्रबन्धानां टीकाकर्तृरूपेणापि तत्प्रसिद्धिर्वर्तत एव। भगवद्गीताभाष्यमपि तेन लिखितम्। रामानुजमते मुक्तिर्नाम नारायणसायुज्यप्राप्तिः। तन्नाम वैकुण्ठलोकगमनम्। तत्र नारायणः शरीरी, जीवप्रकृत्यादि तच्छरीरम्। भक्त्या ज्ञानपूर्वकेण कर्मणा एव मुक्तिः प्राप्यत इति। तथा च नारायणोपनिषदि - "नारायणसायुज्यमवाप्नोति नारायणसायुज्यमवाप्नोति" इति। एवञ्च यथामति विहितमिदं सामान्यं सर्वेषां मनसि आह्लादं जनयेदित्याशास्महे।धन्यवादः।

◆◆◆◆◆◆◆

# ॥ रामानुजचरितम् ॥

- स्नातकद्वितीयवर्षीयः वासुदेव-गराइ।

वीरप्रसविनी इति नाम्ना विदितपरा इयं भारतभूमिः न केवलं वीरान् प्रसूतवती किन्तु विवेकानन्दशङ्करसदृशान् असङ्ख्यान् दार्शनिकान् सन्न्यासिनश्चापि, ये ब्रह्माण्डेस्मिन् गुरुपदवीम् अलङ्कुर्वन्तः विश्वस्य सभायां भारतीयदर्शनस्य प्रतिष्ठां चक्रुः। एतेषु अन्यतमः आसीत् आचार्यः रामानुजः। अयं कदा भारतमातुः अञ्चलमलङ्कृतवानिति निश्चयेन वक्तुं न शक्यते। तथापि एकचत्वारिंशदधिकनवशततमे शकाब्दे तामिलनाडुप्रदेशस्य श्रीपेरेम्बुदुरनामके ग्रामे अयं जनिं लेभे इति बहूनां मतम्। अस्य पिता केशवाचार्यदीक्षितः सर्वक्रतुनाम्ना ख्यातः। माता च कान्तिमती आसीत्।

केशवकान्तिमत्योः विवाहाद् बहुकालं कोपि पुत्रः नाजायत। तस्मात् पुत्रेष्टियागेन पुत्रः लभ्य इति निश्चित्य एकदा तीर्थस्नानार्थं कैरविणीसागरसङ्गमम् आगत्य तत्रैव कस्मिंश्चित् श्रीपार्थसारथिमन्दिरे यागायोजनं कारितवान् केशवदीक्षितः। ततश्च साक्षात् नारायणः एव तत्पुत्ररूपेण आगमिष्यतीति स्वप्नादिष्टः सन् श्रीपेरेम्बुदुरं प्रत्यागतः। अस्य पितृप्रदत्तं नाम आसीत् लक्ष्मणः। आबालम् आसीत् सः प्रतिभावान् धर्मनिष्ठः विनयी सज्जनानुरक्तश्च।

लक्ष्मणः आबाल्यात् हरिभक्तः। अपि च प्रत्येकं हरिभक्तं सः सज्जनं मन्यते स्म। सः शूद्रो वा ब्राह्मणो वा भवतु। एकदा पथि विचरन् लक्ष्मणः काञ्चीपूर्णनामानं शूद्रकुलसम्भवं कञ्चन परमवैष्णवं प्रेक्ष्य प्रसन्नचेताः स्वपरिचयं प्रदाय तं भोजनग्रहणाय आहूतवान्। ततश्च भोजनानन्ते विश्रान्तिसमये पादमर्दनमपि यथायथम् आरब्धवान्। काञ्चीपूर्णस्तु आत्मानं शूद्रं मन्यमानः व्रीडापन्नः सन् लक्ष्मणं पदमर्दनात् यदा निविवारयिषुः तदा 'हरिभक्तिपरायणः एव प्रकृतब्राह्मणः' इति सद्वाक्यं लक्ष्मणमुखात् श्रूत्वा निवारयितुं नापारयत्।

एवमेव एकदा गुरोः यादवाचार्यस्य शुश्रूषाकाले छान्दोग्यस्य "तस्य यथा कप्यासं पुण्डरीकमेवाक्षिणी" इत्यस्य मन्त्रस्य सूर्यमण्डलस्थपुरुषस्य चक्षुंषी

वानरस्य पश्चाद्भागः इव रक्तवर्णौ इति व्याख्यानं श्रूत्वा भक्तिमान् लक्ष्मणः

परमकारुणिकस्य षडैश्वर्यसम्पन्नस्य भगवतः चक्षुर्द्वयं वानरस्य पश्चाद्भाग इव रक्तवर्णे इति तस्य हीनोपमत्वम् आशङ्क्य दुःखितो व्यथितोपि गुरोः वचनविरोधाचरणं नाचचार किन्तु तस्य अस्तं गतः अर्कः इव मुखं प्रेक्ष्य गुरुणा पृष्टे सनम्रः सः स्वातिशयम् अवर्णयत्। ततश्च कप्यासशब्दस्य कं पिबतीति कपिः सूर्यः इति आसशब्दस्य विकसितः इति  एवं समुदायस्य पद्मम् इति अर्थसम्पादनेन सम्पूर्णस्य

मन्त्रस्य सूर्यमण्डलस्थपुरुषस्य चक्षुंषी पद्ममिव रक्तवर्णौ इति अर्थं सम्पादितवान्।

एतत्सर्वं परिलक्ष्य अयं रामानुजाचार्यः आबालं भक्तिमान् प्रतिभावान् सज्जनानुरक्तः विनयी चासीदीति स्पष्टमेव। अनेन प्रचारितदर्शनं विशिष्टाद्वैतदर्शननाम्ना जगति ख्यातिं गतम्। अनेन रचितं ब्रह्मसूत्रोपरि श्रीभाष्यमेव सर्वप्रसिद्धं सर्वमतखण्डनपुरःसरं विशिष्टाद्वैतमतं प्रतिष्ठापयति। किं बहुना, गङ्गास्नानार्थं यथा तटः आवश्यकः तद्वत् सनातनधर्मस्य तथा अखिलधर्मस्य मूलभूतश्रुतिस्मृतिरूपायां प्रवहन्त्यां गङ्गायामपि स्नानार्थं तटः आवश्यकः। अनेन तस्यां विशिष्टाद्वैतरूपः तटः एकः निर्मितः। एवं यथा गङ्गायां स्नातः पवित्रः शूद्धश्च भवति तथा अत्र स्नात्वापि बहवो मुक्ताः बभूवुः बहवश्च भवितारः इति शिवम्।

◆◆◆◆◆◆◆

# ॥ रामानुजाचार्यः ॥

- स्नातकद्वितीयवर्षीयः देवज्योति-कुण्डुः।

## सामान्यपरिचयः -

जगत् प्रतिक्षणं परिवर्तनशीलम्। तस्य च जगतः आधारभूतं यथार्थतत्त्वं ब्रह्म। ब्रह्म अखण्डम् एकरसम् अद्वैतं च। इदं मुख्यम् उपनिषत्प्रतिपाद्यं सिद्धान्तम् आधारीकृत्य एव महर्षिभिः बहुभिः विविधप्रकारैः समालोचितम्। अत एव वेदान्तस्य पञ्च सम्प्रदायाः प्रादुरभूवन्। तेषु च पञ्चसु वेदान्तसम्प्रदायेषु रामानुजाचार्यस्य विशिष्टाद्वैतवादोऽन्यतमः। अस्य विशिष्टाद्वैतवादस्य प्रवर्तकः

आसीत् वैष्णवसम्प्रदायोद्भूतः रामानुजाचार्यः। रामानुजाचार्यस्य विशिष्टाद्वैत-वादस्य प्रवर्तकत्वेन परिचयं विना अपि वैष्णवसम्प्रदायस्य भक्तिपरम्परायां महत्प्रभावकत्वेन परिचयः प्राप्यते।

## जीवनम्: -

सप्तदशोत्तरशततमे ईशवीयाब्दे (१०१७) दक्षिणभारतस्य तमिलनाडुराज्यस्य पेरम्बदूरुक्षेत्रस्य तिरुकुदूरुग्रामे अस्य जन्म अभवत्। बाल्यकाले अस्य नाम आसीत् इलेय-पेरुमल् इति। लक्ष्मणः इत्यपि आसीत् एका अभिधा। बाल्यकाले एव स काञ्चीप्रदेशे यादवप्रकाशाख्यगुरोः वैदिकशिक्षां प्राप्तवान्। इतः परं स यमुनाचार्यस्य प्रधानशिष्यत्वेन ख्यातः जातः। वेदान्ती अयं तदा गुरोः सकाशात् वेदान्ताध्ययने आसीत् तत्परः। परं गुरोः एव इच्छानुसारं ब्रह्मसूत्रस्य, विष्णुसहस्रनाम्नः दिव्यप्रबन्धनस्य च टीकाकर्तृरूपेण स विख्यातः जातः। अनन्तरं गृहस्थाश्रमस्य समाप्तेः परं श्रीरङ्गस्य यतिराजसन्न्यासिसकाशात् दीक्षाग्रहणम् अकरोत्। मैसूरुप्रान्तस्य श्रीरङ्गप्रदेशतः गमनसमये एकदा तेन शालग्रामः प्राप्तः। तदा तेन तस्मिन् ग्रामे स्थित्वा द्वादशवर्षाणि यावत् वैष्णवमतस्य प्रचारः कृतः। पश्चात् च अस्मिन् समग्रे एव प्रदेशे वैष्णवधर्मप्रचारस्य कृते तेन भ्रमणं कृतम्। न केवलम् इदम्, अपि तु तत्र प्रचारानन्तरं सम्पूर्णे भारतवर्षे अपि तेन भ्रमणं कृतम् आसीत् वैष्णवधर्मस्य एव प्राचारार्थम्। ततः सप्तत्रिंशदुत्तरैकादशततमे ईशवीयाब्दे (११३७) विंशत्युत्तरशतवर्षाणि आयुः सम्प्राप्य तमिलनाडुराज्यस्य श्रीरङ्गाख्ये प्रदेशे ब्रह्मणि लीनः अभवत् अयं महापुरुषः।

## विशिष्टाद्वैतदर्शनम् -

वेदान्तदर्शनस्य भेदेषु रामानुजाचार्येण प्रवर्तितं विशिष्टाद्वैतदर्शनम् अन्यतमम्। अस्य सिद्धान्तस्य समर्थने सन्ति त्रयः मुख्याः आचार्याः। ते भवन्ति क्रमशः नाथमुनिः यामुनमुनिः रामानुजाचार्यः च।

नाथमुनेः कालः नवमेशवीयशतकस्य उत्तरार्धम् इति मान्यते। यामुनमुनिः पञ्चाशदुत्तरदशमे ईशवीयाब्दे (१०५०) आसीत् । अयं नाथमुनेः पौत्रः आसीत्। अस्य सिद्धान्तस्य निर्दिष्टस्वरूपम् एषः एव दत्तवान्। अस्य समनन्तरं रामानुजाचार्यः

अस्य मतस्य प्रचारं सुस्थापनञ्च कृतवान्। अनेन रामानुजाचार्येण रचिताः ग्रन्थाः श्रीभाष्यम्, वेदान्तसारः, वेदान्तदीपम्, वेदार्थसङ्ग्रहः, भगवद्गीताभाष्यादयः। एतैः ग्रन्थैः स्वोपदेशेन च एनं सिद्धान्तं समर्थितवान् अस्ति रामानुजाचार्यः। अनेन यशोऽपि प्राप्तः। अतः अस्यैव सिद्धान्तस्य नाम 'रामानुजदर्शनम्' इत्यपि ख्यातिः अस्ति। अस्य मतानुसारेण चेतनाचेतनात्मकं जगत् परमात्मनः शरीरं भवति, परमात्मनः चिदचिदः च शरीरात्मभावः सम्बन्धः भवति। "जगत् सर्वं शरीरं ते" इति शास्त्रकथनेन सर्वस्यापि परमात्मा शरीरमस्ति इति युज्यते। रामानुजाचार्यस्य समनन्तरं नैके दार्शनिकाः ग्रन्थान् रचितवन्तः। तथापि केचन विशिष्टाः ग्रन्थाः उपलभ्यन्ते।

विशिष्टाद्वैतदर्शनस्य मतानुसारेण ब्रह्म नाम ईश्वरः, चित् नाम आत्मा अपि च अचित् नाम प्रकृतिः। किन्तु दर्शनस्य अस्य तत्त्वानुसारेण अर्थाः अवलोक्यन्ते चेत् चिन्नामकस्य पदार्थस्य आत्मतत्त्वम् इति अर्थः भवति अपि च अचिन्नामकस्य पदार्थस्य प्रकृतितत्त्वम् इति अर्थः भवति। किन्तु ब्रह्मणः अर्थात् ईश्वरस्य पुनः भेदाः न भवन्ति। वस्तुतस्तु विशिष्टरूपेण ब्रह्मणः रूपाणि एव ईश्वरेण आधारितानि इति रामानुजाचार्यस्य विशिष्टाद्वैतदर्शनस्य मूलं तत्त्वम् अर्थात् सिद्धान्तः। यथा शरीरस्य आत्मनः च मध्ये कोऽपि भेदः न सम्भवति, तथैव शरीरम् आत्मनः उद्देश्यं पूरयितुं कार्यं करोति इति। एवम् एव ब्रह्मणः पृथक्प्रकारेण चिद्भेदेन अचिद्भेदेन वा किमपि अस्तित्वं न सम्भवति। अस्मिन् दर्शने पूजा, भगवत्कीर्तनं नास्ति।

**भक्तियोगमार्गः —**

एवं विशिष्टाद्वैतदर्शनं विहाय अपि रामानुजाचार्येण भक्तिः संस्कृता। तस्य नये भक्तिः नाम आसीत् ईश्वरस्य ध्यानम् अर्थात् प्रार्थना। सामाजिकानां जनानां कृते तेषां जातिभेदान् अगणय्य अपि भक्तियोगस्य मार्गं दर्शितवान् अपि च सर्वेषाम् एव जनानां भक्तिः साध्या इति तस्य मतम् आसीत्।

**उपसंहारः —**

अयं रामानुजाचार्यः एवं प्रकारेण विशिष्टाद्वैतदर्शनं प्रवर्तयन्, तस्य प्रचारं कुर्वन्, विशिष्टाद्वैतदर्शनसम्बन्धानि पुस्तकानि च रचयन्, भक्तियोगेन

सामाजिकान् जनान् मार्गं च दर्शयन् विंशत्युत्तरशतं वर्षाणि यावत् विशिष्टाद्वैतदर्शनस्य भक्तियोगस्य च ध्वजे स्वीकृत्य सुखानि दुःखानि च स्वस्य आशीर्वादरूपेण भावयन् पुण्यभूमेः भारतवर्षस्य गौरवं यथाचेष्टम् अवर्धयत् इति शम्।

◆◆◆◆◆◆◆

## ॥ रामानुजाचार्यः ॥

**- स्नातकद्वितीयवर्षीयः प्रभात-कुमार-मण्डलः।**

**चरणानुग्रहेणैव ब्रह्मदैत्यो विताडितः।**
**राजपुत्रीशरीराद्वै येन तस्मै नमो नमः॥**
**दर्शितो भक्तिमार्गश्च रामानुजाय येन च।**
**आचार्याय नमस्तस्मै करुणाभक्तिमूर्तये॥**

मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी इति वचनस्वारस्येन परमपुरुषार्थलाभसाधनवरा भक्तिरेव। काले काले सा मानवमनःसरोवरे दशशतकरधरप्रस्फुटितपद्मवत् यैः प्रकाशिता तेषां धुरि वर्तमानः रामानुजाचार्यः। पेरम्वुदुरनिवासिनः सर्वक्रत्वित्यपराभिधेयस्य विप्रवरस्य केशवदीक्षितस्य कान्तिमत्याः चात्मज आचार्यरामानुजः।

पितुरधीत्य वेदान् विदुषः यादवप्रकाशाच्चायं वेदान्तादीनामध्ययनाय तमुपजगाम। परन्तु मतविरोधादाचार्यमतानादरात् च यादवः तस्मिन् मत्सर आसीत्। कदाचित् स तीर्थगमनव्याजेन तं हन्तुमपि प्रवृत्त आसीत्। परन्तु भक्ताधीनेन भगवता तेषामभिलाषा न पूरिता।

कदाचित् भगवद्भक्तिलाभाय भक्तोच्छिष्टमात्रादने भक्तिलाभः इत्याकर्ण्य रामानुजः परमवैष्णवभक्तस्य शूद्रस्य काञ्चीपूर्णस्यापि उच्छिष्टभोजनेपि प्रवृत्तः। परन्तु नारायणपादपद्मसेवकः स तस्य मनोभिलाषां विज्ञाय तदनुपस्थितौ गृहमागत्य आञ्जसा भुक्त्वा भोजनपात्रं स्थानं च परिष्कृत्य तस्य आगमनात्पूर्वमेव गतः। परं यो भक्तिमार्गदर्शिता भविता तस्यैतादृशी व्याकुलता न विलक्षणा।

वैष्णवधर्माचार्यः त्यागिवरः यामुनाचार्यः कदाचित् श्रीवरदराज-दर्शनाभिलाषी काञ्चीपुरमागत्य सयादवमेनमवलोक्यैव अयं वैष्णवमत-ध्वजधारको भविता इति अवजगाम। किञ्च स भगवति विश्वासं संस्थाप्य तदागमनप्रतीक्षां चकार। परन्तु सहसा एव अस्वास्थ्यकारणात् शिष्यं महापूर्णं रामानुजमानेतुं प्रेषयामास। परन्तु तस्यागमनात्पूर्वमेव ते पार्थिवशरीरं विहाय वैकुण्ठं गताः। अन्तिमकर्मार्थं तत्पूतदेहं कावेरीतटमानीतमित्यवलोक्य दुःखशोकातुरः रामानुजः श्रीरङ्गनाथमनवलोक्य एव तत्क्षणं काञ्चीं प्रति प्रस्थितः।

करुणामूर्तेः करुणानिदर्शनं यथा श्रीरङ्गमसमीपे गोष्ठुपुराभिधेये ग्रामे यामुनाचार्यशिष्यः नारायणमन्त्रसिद्धः गोष्ठिपूर्णः निवसति स्म। मन्त्रशक्तिबलात् गुरुमुखात् श्रवणमात्रमेवानुभवो भवति स्म। रामानुजः तत्प्राप्त्यभिलाषया तमुपेत्य प्रार्थयामास। स परमागच्छ इत्युक्त्वा तेन प्रेषितः। एवमष्टादशवारं प्रत्याख्याताय तस्मै तुष्टः स मन्त्रं प्रददौ। मन्त्रश्रवणमात्रेणैवानिर्वचनीयानन्देन तद्हृदयं व्याप्तम्। कियद्दूरं गत्वैव स अनधिकारिणे न देयोनधिकारिणे दत्तेस्मिन् ते नरकवासो भविता इति गुरुनिषेधमुल्लङ्घ्य मूढान् संसारिणः पश्यन् सर्वेभ्य एव मन्त्रं प्रददौ इति ज्ञातेन क्रुद्धेन गुरुणा पृष्ट एते बहु कष्टमनुभवन्ति। एतेषां कृते यदि ममैकस्य नरकवासः तेन न हानिरित्युवाच।

किं बहुना भगवता श्रीरामानुजाचार्येण बहूनि अमूल्यानि ग्रन्थरत्नानि अस्मभ्यमुपहृतानि। ग्रन्थरत्नाकरे तस्मिन् तेषां श्रीभाष्यं वेदान्तसारसङ्ग्रहश्च पद्मरागायेते। मूलं यथा वृक्षाधारो भवति तथा एतेपि श्रीसम्प्रदायरूपवृक्षस्य मूलरूपाधाराः सन्ति।

◆◆◆◆◆◆◆

# ॥ विशिष्टाद्वैतमते भगवान् नारायणः ॥

- आचार्यद्वितीयवर्षीयः मनमय-मान्ना।

वेदान्तसम्प्रदायेषु श्रीसम्प्रदायः एकः अन्यतमः सम्प्रदायः। सम्प्रदायस्यास्य प्रधानः आचार्यः श्रीरामानुजाचार्यः। अष्टमशतके वेदान्ताकाशे उदितस्य श्रीमच्छङ्करभगवत्पादरूपारुणस्य अद्वैतज्ञानालोकेन अज्ञानान्धकारनाश-

समये अन्ये सम्प्रदायाः चन्द्रतारकादिवत् क्षीणप्रभाः बभूवुः। तन्मध्ये

श्रीसम्प्रदायोऽपि आसीत्। अस्य वैष्णवसम्प्रदायस्य रक्षणाय स्वगुरोः यामुनाचार्यस्य आदेशबलात् प्रस्थानत्रयमाश्रित्य भाष्यं लिलेख रामानुजाचार्यः। तदेवास्य सम्प्रदायस्य भित्तिस्वरूपम्। अस्य मते चिदचिद्विशिष्टः श्रीमन्नारायणः अद्वैततत्त्वरूपः। एतादृशं स्वगतभेदविशिष्टमद्वैततत्त्वं प्रधानीकृत्य सम्प्रदाय-प्रतिष्ठापनात् सम्प्रदायोऽयं विशिष्टाद्वैतसम्प्रदायनाम्ना लोके सुप्रसिद्धः। श्रीमन्नारायणयसायुज्यप्राप्तिरेव अस्मिन् मते परमप्राप्तिः। अर्थात् वैकुण्ठलोकं गत्वा भोगसाम्यप्राप्तिरेव मुक्तिः। तच्च भक्तैः ज्ञानपूर्वेण कर्मणा प्राप्यते। उक्तञ्च रामानुजाचार्येण ब्रह्मसूत्रभाष्ये द्वितीयाध्याये "यथाधिकारं भक्तैः ज्ञानपूर्वेण कर्मणा अभ्यर्चितं सम्यक् प्राप्यते।" इति।

परन्तु तत्र मुक्तिप्रदायकस्यास्य नारायणस्य स्वरूपं किमिति प्रश्नो भवति। न रीयते न क्षीयते इति नरः परमात्मा। तस्येदं नारं जीवजगदादि। तद् एति जानातीति नारायणः। स्मृतिषु स्मर्यमाणो नारायणो यथा -

**आपो नारा इति प्रोक्ता आपो वै नरसूनवः।**
**अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥ इति।**

विशिष्टाद्वैतमते नारायणः सगुणः, तथा हि श्रीभाष्ये रामानुजाचार्येण "सगुणत्वात् स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यम्" इति। अयमेव व्यापनशीलः विष्णुः, षण्णां सम्पदामधिकारी भगवान्। उच्यते च -

**ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।**
**ज्ञानवैराग्ययोश्चैव षण्णां वर्गो भगो मतः॥**

किञ्च -

**उत्पत्तिञ्च विनाशञ्च भूतानामगतिं गतिम्।**
**वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥ इति।**

पुराणेषु क्वचित् नारायणस्य सर्वज्ञतादयः षड् गुणाः उक्ताः। अयं परमात्मा स्वेच्छया त्रिविधरूपेण स्वं व्यनक्ति। तानि च रूपाणि सूक्ष्मव्यूहविभवभेदभिन्नानि। तथा च रामानुजाचार्यः उक्तवान् "परं ब्रह्म सम्पूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नम्" इति। तत्र विभवो नाम

श्रीभाष्यकारेणोच्यते "रामकृष्णादिप्रादुर्भावगणः" इति। अर्थात् जगति अवतीर्णाः

सर्वे अवताराः विभवपदेनोच्यन्ते। व्यूहो नाम "संकर्षणप्रद्युम्नानिरुद्धरूपः" इति रामानुजाचर्येणैव उक्तम्। सङ्कर्षणो नाम जीवः, प्रद्युम्नो नाम मनः, अनिरुद्धोऽहङ्कारः इति च। सूक्ष्मः नाम षाड्गुण्यविग्रहः वासुदेवः। एषः अस्मिन् सम्प्रदाये परब्रह्मनाम्ना उच्यते।अयमेव नित्यश्चिदचिद्विशिष्टनियामकः एकः शरीरी। चिद् जीवः अचिद् प्रकृत्यादि सर्वमस्य शरीरम्। परन्तु शरीररूपस्य जीवस्य प्रकृत्यादेर्वा गुणदोषैः एषः परमात्मा क्वचिदपि स्पृष्टो न भवति। यथा बाल्ययौवनादिशरीरगुणैः जीवः कदाचिदपि प्रभावितो न भवति तथा।

अन्येषु शास्त्रेषु यः सदाशिवः, शक्तिः, परब्रह्म इत्यादिनाम्ना उच्यते विशिष्टाद्वैतमते स एव श्रीरङ्गपतिः भक्तनायकः तिरुपतिः नारायणाख्यो विष्णुः। तथा च नारायणोपनिषदि "नारायण एवेदग्ं सर्वम्। न द्वितीयोऽस्ति कश्चित्।" इति। तस्य सर्वशक्तिमत्ता उक्ता रामानुजाचार्येण ब्रह्मसूत्रे जन्माद्यधिकरणे "सकलजगज्जन्मादिकारणं निरवद्यं सर्वज्ञं सत्यसङ्कल्पं सर्वशक्तिः ब्रह्म" इति।

◆◆◆◆◆◆◆